# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा –** आचार्य-**2** | **सत्रम् – 3** | **गुणाः - 70** |
| **विषयः –** पुराणेतिहासः | **प्रश्नपत्रम् - 3 - CC - 5.3.8** | **समयः- 3 तः 6** |
| **दिनाङ्कः- 11/10/2019** | **सन्दर्भग्रन्थः –** ब्रह्मवैवर्तपुराणे ब्रह्मखण्डः | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 एकस्य ससन्दर्भपूर्वकं भावार्थो लेख्यः। 05**

1. आविर्बभूव तत्पश्चात् कृष्णस्य रसनागतः।
   शुद्धस्फटिकसङ्काशा देवी चैव मनोहरा ।।
2. गोगोपगोप्यो गोलोके किं नित्याः किं कल्पिताः।
   मम सन्देहभेदार्थं तन्मे व्याख्यातुमर्हति ।।

**प्र-2 एकस्य यथाग्रन्थं वर्णनं कुरुत। 10**

1. सृष्टिनिरूपणं ग्रन्थानुसारं कुर्वन्तु।
2. ब्रह्मणो नारदस्य परस्परशापप्रसङ्गो वर्णनीयः।

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 एकस्य ससन्दर्भपूर्वकं भावार्थो लेख्यः। 05**

1. सुदर्शनं संनियोग्य भक्तानां रक्षणाय च।
   तथापि न हि निश्चिन्तोऽवतिष्ठेत् भक्तसन्निधौ ।।
2. पुत्रोत्सवे च रत्नानि धनानि विविधानि च।
   गन्धर्वगणः प्रददौ ब्राह्मणेभ्यो मुदान्वितः ।।

**प्र-4 एकस्य सविस्तरमुत्तरं लिखत। 10**

1. विष्णु-वैष्णव-ब्राह्मणप्रसंशावर्णनं क्रियताम्।
2. सर्वरोगचिकित्सावर्णनं क्रियताम्।

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 पद्यं सप्रसङ्गं लिखत। 05**

1. आविर्भावस्तिरोभावः स्वेच्छया नित्यदेहिनाम्।
   जन्ममृत्युजराव्याधि भक्तानां नास्ति शौनक ।।
2. क्षणेन विप्रप्रवरो मुदान्वितो जगाम शम्भोः सदनं मनोहरम्।
   ऊर्ध्वं ध्रुवाद्योजनलक्षमीप्सितं रत्नेन निर्माणकृतश्च शूलिना ।।

**प्र-6 एकस्य सविस्तरमुत्तरं लिखत । 10**

1. ब्रह्मणः दशगुणानां नाम व्युत्पत्तिं लिखत ।
2. ब्रह्मनारदाभ्यां कृतं सांसारिक सुखवर्णनं कुर्वन्तु ।

**प्र-7 ससन्दर्भं व्याक्या कार्या । 05**

1. श्रुतं सर्वं जगन्नाथ त्वत्प्रसादाज्जगद्गुरो ।
   भवान्ब्रह्मस्वरूपं च वद ब्रह्मनिरूपणम् ।।
2. ददर्शाश्रममाश्चर्यं देवर्षिनारदस्तथा ।
   ऋषेर्नारायणस्यैव बदरीवनसंयुतम् ।।

**(चतुर्थान्वितिः - युनिट-4 )**

**प्र-8 एकस्य सविस्तरमुत्तरं लिखत । 10**

1. शिव-नारदसंवादः यथाग्रन्थं लिखत ।
2. ब्रह्मशापकारणात् उपबर्हणस्य शूद्रस्त्रीरूपेण जन्मवर्णनं कुर्वन्तु ।

**प्र-9 दश प्रश्नानां लघूत्तरं लिखत । 10**

1. सिंहिकाया अपरं नाम किम्
2. कद्रुपुत्र्याः नाम किमासीत्
3. कुक्कुरादयः कस्याः पुत्राः सन्ति
4. जरत्कारुपुत्रनाम किमासीत्
5. सिद्धिः कतिविधा काश्च ताः
6. मुक्तिः कतिविधा काश्च ताः
7. महाकल्पाः कति के च ते
8. ब्रह्मणा कस्मै शापो दत्तः
9. ब्राह्मणाय के, किन्नाम्नी कन्या दत्ता
10. पथ्विपुत्रनाम किमासीत्
11. लक्ष्मी गृहीत् कथं गच्छति
12. दक्षिणा कस्य भार्या आसीत्
13. दुर्वासाः कं शशाप
14. पुरा गोलोके किन्नाम्नी गोपी आसीत्
15. स्वाहा केषां भार्या अस्ति

********************